# पञ्चमः पाठः
# पर्यावरणम्

**पं. प्रभुदत्तशर्मा 'आत्रेयः'**

## परिचयः

पर्यावरणविषयम् अधिकृत्य विरचितात् पर्यावरणशतकात् कानिचित् पद्यानि सञ्चित्य अयं पाठः 'पर्यावरणम्' इति सङ्कलितोऽस्ति। अत्र पर्यावरणस्वरूपं निरूप्य तत्प्रदूषणस्य कारणानि प्रदर्शितानि सन्ति। सङ्क्षेपतः प्रदूषणोपशमनस्य उपाया अपि निरूपिताः।

एकादश–पद्यात्मकपाठस्य प्रारम्भे श्लोकद्वये पर्यावरणस्वरूपं स्पष्टीकृतम्। तृतीये चतुर्थे च पद्ये प्रकृतेः स्वरूपम् उपलभ्यते। अग्रे एतत् प्रतिपादितमस्ति यत् इयं प्रकृतिः सेवनयोग्या सुखदायिनी तु विद्यते किन्तु अस्याः दोहनम् अतिशयेन भवतीति चिन्तनीयम्। अस्याः अतिशयदोहनात् एव प्राकृतिकप्रकोपाः जायन्ते। एतत् सर्वं विविच्य अन्ते सर्वेभ्यः मङ्गलकामना कृता अस्ति।

अस्य रचयिता पं. प्रभुदत्तशर्म–आत्रेय–महोदयः वर्तते। झुँझुँनूमण्डलस्य खेतडीनगरसमीपे प्रपूर्णग्रामवास्तव्यानां षट्शास्त्रकेसरिणां परमकारणाद्वैतसिद्धान्त– प्रतिष्ठापकाचार्यवर्याणां श्रीबदरिप्रसादशास्त्रिणां पुत्रत्वेन लब्धजन्मा प्रभुदत्तमहाभागः व्याकरण–साहित्य–दर्शन विषयेषु आचार्योऽस्ति। विद्वत्कवेरस्य संस्कृतभाषायां विरचिता इमाः कृतयः सन्ति –

(1) श्रीरामेश्वरचरितम् – पद्यमयं खण्डकाव्यम् (2) सुस्तबकः – पद्यसङ्ग्रहः (मुक्तकानाम् इति) (3) भट्टारिका–गद्यकाव्यम्।

हिन्दीभाषायाम् अपि सजग प्रहरी, पत्रवेदना, विरह–सरित्, माता (उपन्यासः) इत्येताः रचनाः वर्तन्ते। सम्पादन– समीक्षात्मकादिकर्मणि अपि पण्डितप्रवरस्य प्रभुदत्तमहोदयस्य पर्याप्तकर्तृत्वम् अवलोक्यते।

अयं महानुभावो जैनविश्वभारतीलाडनूँ–संस्थाने प्राध्यापकपदम् अलङ्कृत्य साम्प्रतं जयपुरस्थे श्रीदिगम्बरजैनसंस्कृतमहाविद्यालये प्राध्यापकपदात् सेवानिवृत्तः सततं संस्कृतसाहित्यश्रीसंवर्धने संलग्नो वर्तते।

# पर्यावरणम्

**आद्या सृष्टिरियं स्रष्टुश्चेतनाऽचेतनात्मिका।**
**पुरुषस्योपकाराय पर्यावरणताङ्गता।। 1 ।।**

**पदच्छेदः :–** आद्या सृष्टिः इयम् स्रष्टुः चेतन + अचेतन + आत्मिका। पुरुषस्य उपकाराय पर्यावरणताम् गता।

**अन्वयः :–** स्रष्टुः चेतनाचेतनात्मिका इयम् आद्या सृष्टिः (एव) पुरुषस्य उपकाराय पर्यावरणतां गता।

**व्याख्या –** स्रष्टुः – विधातुः, ब्रह्मणः, सृष्टिकर्तुः इत्यर्थः। चेतनाचेतनात्मिका, चराचरात्मिका, चेतनरूपा अचेतनरूपा च। इयम् – एषा, दृश्यमाना वर्तमाना वा। आद्या – प्रथमा। सृष्टिः – सर्जनम्, रचना, प्रकृतिः इत्यर्थः। एव। पुरुषस्य – मानवस्य, उपलक्षणमात्रमिदं सर्वेषामपि प्राणिनाम् इत्यर्थः ग्राह्यः। उपकाराय – कल्याणाय। पर्यावरणताम् – पर्यावरणस्वरूपम्, गता – प्राप्ता।

**भावार्थः –** ब्रह्मणः चेतनरूपा अचेतनरूपा च एषा प्रथमा सृष्टिः प्रकृतिरस्ति, सैव प्रकृतिः सर्वेषां प्राणिनां कल्याणाय पर्यावरणस्वरूपं धारयति।

**व्याकरणम् –** पुरुषस्योपकाराय – पुरुषस्य + उपकाराय, स्वरसन्धिः ,गुणः। स्रष्टुश्चेतनाचेतनात्मिका – स्रष्टुः + चेतनाचेतनात्मिका, विसर्गसन्धिः सत्व–श्चुत्वम्। पर्यावरणताङ्गता – पर्यावरणताम् + गता, व्यञ्जन–सन्धिः, अनुस्वार–परसर्वणः। सृष्टिरियम् – सृष्टिः + इयम्, विसर्गसन्धिः रुत्वम्।

चेतनाचेतनात्मिका – चेतनं च अचेतनं च इति चेतनाचेतने, चेतनाचेतने आत्मा यस्याः सा चेतनाचेतनात्मिका (क–प्रत्ययः) द्वन्द्वगर्भबहुव्रीहिः।

सृष्टिः –सृज् + क्तिन्। स्रष्टुः –सृज् + तृच् (ङस्)। उपकाराय–उप + कृञ् + घञ् (ङे.)।

**ब्रह्माण्ड–प्राणभूता या विश्वं वृत्वाऽवतिष्ठते।**
**पर्यावरण–नाम्ना सा कथ्यते प्रकृतिः परा।। 2।।**

**पदच्छेदः –** ब्रह्माण्ड–प्राणभूता या विश्वं वृत्वा अवतिष्ठते। पर्यावरण–नाम्ना सा कथ्यते प्रकृतिः परा।

**अन्वयः –** बह्माण्ड–प्राणभूता या परा प्रकृतिः विश्वं वृत्वा अवतिष्ठते सा पर्यावरणनाम्ना कथ्यते।

**व्याख्या –** ब्रह्माण्डप्राणभूता – समस्तभुवनजीवरूपा। या – दृश्यमाना। परा प्रकृतिः –प्रकटरूपा प्रकृतिः, ब्रह्मणः द्वे प्रकृती परा प्रकटरूपा, अपरा निगूढरूपा च। विश्वं – संसारम्, सकललोकं वा। वृत्वा – आवरणं कृत्वा। अवतिष्ठते सुष्ठु व्यवस्थिता वर्तते। सा–पूर्वोक्ता प्रकटरूपा प्रकृतिः। पर्यावरणनाम्ना – 'पर्यावरणम्' इति नामद्वारा। कथ्यते–उच्यते। पृथ्वी–जल–तेज–वायु–आकाशरूपा प्रकृतिः एव पर्यावरणम् इत्युच्यते।

**भावार्थः –** पृथ्वी–जल–तेज–वायु–आकाशरूपा समस्तभुवनस्य जीवनरक्षा च प्रकृतिः संसारम् आवृत्य व्यवस्थिता अस्ति, सा प्रकटरूपा प्रकृतिः एव पर्यावरणनाम्ना ज्ञायते।

**व्याकरणम्** – वृत्वाऽवतिष्ठते–वृत्वा + अवतिष्ठते, स्वरसन्धिः, सवर्णदीर्घः। ब्रह्माण्डप्राणभूता – ब्रह्माण्डस्य प्राणभूता, षष्ठीतत्पुरुषः। अवतिष्ठते – अव + स्था + लट् (प्रथमपुरुषः एकवचनम्) वृत्वा – वृञ् + क्त्वा। पर्यावरणम् – परि + आङ् + वृञ् + ल्युट्।

**चेतनाऽचेतने शक्ती विद्येते पुरुषस्य वै।**

**अतस्ते स्वस्वभावेन सञ्जोषेते परस्परम्।। 3 ।।**

**पदच्छेदः** – चेतन + अचेतने शक्ती विद्येते पुरुषस्य वै। अतः ते स्वस्वभावेन सञ्जोषेते परस्परम्।

**अन्वयः** – पुरुषस्य वै चेतनाऽचेतने शक्ती विद्येते। अतः ते स्वस्वभावेन परस्परं सञ्जोषेते।

**व्याख्या** – पुरुषस्य – ब्रह्मणः, सृष्टिकर्तुः इत्यर्थः। वै–निश्चयेन। चेतनाऽचेतने–चैतन्ययुक्ता चैतन्यरहिता च। शक्ती – शक्तिद्वयी, सत्ताद्वयी वा। विद्येते – वर्तेते, विद्यमाने स्तः। अतः – एतस्मात् कारणात्। ते–चेतनाचेतने शक्ती, स्वस्वभावेन–स्वस्य स्वभावेन अर्थात् चैतन्यस्वभावेन अचैतन्यस्वभावेन च। परस्परम् – मिथः। सञ्जोषेते – संसेवेते, सापेक्षे स्तः इत्यर्थः।

**भावार्थः** – ब्रह्मणः शक्तिस्वरूपं वर्णयति कविः – परमपुरुषस्य ब्रह्मणः

चेतनरूपा अचेतनरूपा च द्वे शक्ती वर्तेते। ते चेतनाचेतने शक्ती निजस्वभावेन अर्थात् चैतन्यस्वभावेन अचैतन्यस्वभावेन च परस्परं सापेक्षे वर्तेते, सेवां कुरुतः इत्याशयः।

**व्याकरणम्** – सञ्जोषेते – सम् + जोषेते, व्यञ्जनसन्धिः, अनुस्वार–परसवर्णः। चेतनाऽचेतने – चेतना च अचेतना च इति द्वन्द्वः। स्वस्वभावेन – स्वस्य स्वभावः तेन–षष्ठी तत्पुरुषः। शक्तिः शक् + क्तिन्। विद्येते – विद् + लट् (प्रथमपुरुषः द्विवचनम्)

**जडे जडात्मिका शक्तिः चेतने चेतनात्मिका।**

**समाराध्या सदा सद्भिरक्षुब्धा सुखदाऽस्ति सा।। 4 ।।**

**पदच्छेदः** – जडे जडात्मिका शक्तिः चेतने चेतनात्मिका। समाराध्या सदा सद्भिः अक्षुब्धा सुखदा अस्ति सा।

**अन्वयः** – जडे जडात्मिका चेतने (च) चेतनात्मिका शक्तिः सद्भिः सदा समाराध्या। अक्षुब्धा सा सुखदा अस्ति।

**व्याख्याः** – जडे – जडपदार्थे, अचेतने इत्यर्थः। जडात्मिका – जडत्वरूपा। चेतने – चेतनभूतेषु, जीववनस्पत्यादिषु इत्यर्थः। चेतनात्मिका – चैतन्यरूपा। शक्तिः – ब्रह्माण्डप्राणभूता सा प्रकटरूपा प्रकृतिः। सद्भिः – सत्पुरुषैः, साधुजनैः। सदा – नित्यम्, सततम्। समाराध्या – आराधनीया, अनुकूलनार्थं प्रयतनीया। अक्षुब्धा – क्षोभरहिता, अविकारिता। सा – परा प्रकृतिशक्तिः। सुखदा – आनन्दप्रदायिनी, कल्याणकारिणी। अस्ति– भवति, वर्तते इत्यर्थः।

**भावार्थः** – प्रकृतिशक्तिं प्रति अस्माकं कर्तव्यं वर्णयति कविः – जडपदार्थेषु जडत्वरूपा शक्तिः तथैव चेतनभूतेषु चैतन्य–युक्ता ब्रह्माण्डप्राणभूता सा प्रकृतिशक्तिः अस्माभिः सदैव आराधनीया, अर्थात् अस्माभिः सदैव प्रकृतेः अनुकूलनार्थं प्रयासाः करणीयाः। सन्तुलिता प्रकृतिः सदा कल्याणकारिणी भवति।

**व्याकरणम्** – जडात्मिका–जड + आत्मिका, स्वरसन्धिः सवर्णदीर्घः। सद्भिरक्षुब्धा–सद्भिः + अक्षुब्धा, विसर्गः रुत्वम्। अक्षुब्धा – न क्षुब्धा, नञ्तत्पुरुषः। सुखदा – सुखं ददाति (उपपदसमासः) आराध्या

– आड्. + राध् + ण्यत् + टाप्। क्षुब्धा –क्षुभ्+क्त+टाप्।

**मातेव सेवनीया स्यादचिच्छक्तिश्चिदाश्रया।**

**सेविता सर्वसौख्यानां जनयित्री भवेद् हि नः।। 5 ।।**

**पदच्छेदः** – माता इव सेवनीया स्यात् अचित् शक्तिः चित् + आश्रया। सेविता सर्वसौख्यानाम् जनयित्री भवेत् हि नः।

**अन्वयः** – चिदाश्रया अचित् शक्तिः माता इव सेवनीया स्यात्। सेविता हि सा नः सर्वसौख्यानां जनयित्री भवेत्।

**व्याख्या** – चिदाश्रया – चेतनशक्तिं समाश्रिता। अचित् – अचेतनात्मिका। शक्तिः – प्रकृतिः। माता–जननी, जन्मदात्री इत्यर्थः। इव – यथा। सेवनीया स्यात् – सेवितव्या सेव्या वा स्यात्। सेविता – जुष्टा। हि – निश्चयेन। सा – अचित् शक्तिः। नः अस्माकम्, सर्वेषामपि प्राणिनाम्। सर्वसौख्यानाम् – सकलविधकल्याणानाम्, आनन्दानाम् इत्यर्थः। जनयित्री – उत्पादनकर्त्री, उत्पादयित्री वा। भवेत् – वर्तेत स्यात् वा।

**भावार्थः** – पर्यावरणरूपायाः प्रकृतिशक्तेः सेवनप्रकारं निरूपयति कविः – सा अचेतनशक्तिः चेतनशक्तिम् एव अवलम्बते। अतः अस्माभिः तस्याः शक्तेः माता इव सेवा करणीया। सेव्यमाना सा अस्माकं सर्वसुखानां जन्मदायिनी भवेत्।

**व्याकरणम्** – मातेव – माता + इव, स्वरसन्धिः गुणः। अचिच्छक्तिः – अचित् + शक्तिः, व्यञ्नसन्धिः श्चुत्वम्, छत्वम्। स्यादचित् – स्यात् + अचित्, व्यञ्नसन्धिः, जश्त्वम्। सर्वसौख्यानाम् – सर्वाणि च तानि सौख्यानि तेषाम् (कर्मधारयः) अचित् – न चित् (नञ्– तत्पुरुषः) सेवनीया – सेव् + अनीयर् + टाप्। सेविता – सेव + क्त + टाप्। सौख्यम् – सुख + ष्यञ्। जनयित्री – जन् + तृच् + ङीप्। आश्रया – आङ्. + श्रि + अच् + टाप्।

**यदि सोद्वेलिताऽस्माभिः भवतीह कदाचन।**

**तदा तनोति जालं सा दुःखानां परमार्तिदम्।। 6 ।।**

**पदच्छेदः** – यदि सा उद्वेलिता अस्माभिः भवति इह कदाचन। तदा तनोति जालम् सा दुःखानाम् परम + आर्तिदम्।

**अन्वयः** – यदि सा इह अस्माभिः कदाचन उद्वेलिता भवति, तदा सा परमार्त्तिदं दुःखानां जालं तनोति।

**व्याख्या** – यदि – चेत्। सा – प्रकृतिशक्तिः। इह – अत्र, अस्मिन् लोके। अस्माभिः मनुष्यैः। कदाचन – कदाचिदपि। उद्वेलिता–विकारिता, असन्तुलिता इत्यर्थः। भवति–जायते। तदा–तर्हि। सा – पूर्वोक्ता प्रकृतिः। परमार्त्तिदम् – परमकष्टकारकम्, अत्यन्तपीडादायकम्। दुःखानाम् – कष्टानाम्। जालम् पाशम्। तनोति–प्रथयति, विस्तरं करोति।

**भावार्थः** – प्रकृतिशक्तेः उद्वेलनस्य दुष्परिणाममाह– यदि वयं प्रकृतिशक्तिम् उद्वेलितवन्तः तदा असन्तुलिता सा अत्यन्तपीड़ादायकं दुःखसमूहं विस्तारयति। अतः प्रकृतिशक्तेः उद्वेलनं नैव करणीयम्।

**व्याकरणम्** – सोद्वेलिता – सा + उद्वेलिता, स्वरसन्धिः गुणः। भवतीह – भवति + इह स्वरसन्धिः, सवर्णदीर्घः।

परमार्त्तिदम् – परमा चासौ आर्त्तिः परमार्त्तिः, तां ददाति इति परमार्त्तिदः, तम् (कर्मधारय– गर्भ–उपपदसमासः)। तनोति – तन् + लट् (प्रथमपुरुषः एकवचनम्)

**प्रकृतेर्दोहनं मा भूत्, दोहनं दुःखदं स्मृतम्।**
**पश्यन्त्वाणविकस्फोटाज्जीर्यमाणमभून्नभः।। 7 ।।**

**पदच्छेदः** – प्रकृतेः दोहनम् मा भूत् दोहनम् दुःखदम् स्मृतम्। पश्यन्तु आणविकस्फोटात् जीर्यमाणम् अभूत् नभः।

**अन्वयः** – प्रकृतेः दोहनं मा भूत्। दोहनं दुःखदं स्मृतम्। पश्यन्तु आणविकस्फोटात् नभः जीर्यमाणम् अभूत्।

**व्याख्या** – प्रकृतेः – प्रकृतिशक्तेः ब्रह्माण्डप्राणरूपायाः इत्यर्थः। दोहनम्–उद्वेलनम्। मा भूत्–न स्यात्। दोहनम् – आलोडनम्, उद्वेलनम्। दुःखदम् – पीडाकारकम्, कष्टदायकम् वा। स्मृतम् – कथितम्। पश्यन्तु–विलोकयन्तु। आणविकस्फोटात् – अणुजन्यविस्फोटात्, परमाणुविस्फोटादिभ्यः इत्यर्थः। नभः – अन्तरिक्षम्। जीर्यमाणम् – क्षीयमाणम्। अभूत् – सञ्जातम्।

**भावार्थः** – प्रकृतेः दोहनस्य दुष्परिणामं दर्शयति कविः यत् प्रकृतेः दोहनं नैव करणीयम्। पर्यावरणविदः स्वीकुर्वन्ति यत् अस्याः दोहनं पीडादायकं भवति। परमाणुविस्फोटेन अन्तरिक्षं जीर्यमाणं सञ्जातम्। अत्र ओजोन – आस्तरणस्य क्षीयमाणस्थितिः निर्दिष्टा वर्तते।

**व्याकरणम्** – पश्यन्त्वाणविकस्फोटात् – पश्यन्तु + आणविकस्फोटात्, स्वरसन्धिः यण्। अभून्नभः – अभूत् + नभः व्यञ्जनसन्धिः, अनुनासिकः। आणविकस्फोटात् – अणोः इदम् आणविकम्, आणविकः चासौ स्फोटः आणविकस्फोटः तस्मात् (कर्मधारयः)। दुःखदम् – दुःखं ददाति तम् (उपपदसमासः) दोहनम् – दुह् + ल्युट्। स्मृतम् – स्मृ + क्त। स्फोटः – स्फुट + घञ्।

**जीर्णाकाशात् समायान्ति विषाक्ता रश्मयो भुवम्।**
**अल्ट्राख्या भास्करीयास्ते गिलन्तो जीवनं हि नः ।। 8 ।।**

**पदच्छेदः –** जीर्ण + आकाशात् समायान्ति विषाक्ताः रश्मयः भुवम्। अल्ट्राख्याः भास्करीयाः ते गिलन्तः जीवनम् हि नः।

**अन्वयः –** जीर्णाकाशात् विषाक्ताः अल्ट्राख्याः ते भास्करीयाः रश्मयः हि नः जीवनम् गिलन्तः भुवम् समायान्ति।

**व्याख्या** – जीर्णाकाशात् – परमाणुविस्फोटादिभिः क्षीणाकाशात्। विषाक्ताः – विषाणुभरिताः विषसम्पृक्ताः। अल्ट्राख्याः अल्ट्रानामकाः, अल्ट्रावायलेट इति नाम्ना प्रसिद्धाः। ते भास्करीयाः – तादृशाः सौराः। रश्मयः – किरणाः सूर्यकिरणाः इति भावः। हि – निश्चयेन। नः – अस्माकम्। जीवनम् – प्राणशक्तिम् जीवितम्। गिलन्तः भक्षयन्तः, विनाशयन्तः, इत्यर्थः। भुवम् – पृथ्वीलोकम्। समायान्ति – समागच्छन्ति।

**भावार्थः** – विषाक्तकिरणानां प्रभावं दर्शयन् एवमाह कविः यत् परमाणुविस्फोटादिभिः क्षीणगगनाद् विष–सम्पृक्ताः अल्ट्रानामकाः सूर्यरश्मयः प्राणिजीवन–विघाताय कल्पन्ते।

**व्याकरणम्** – विषाक्ताः –विष + अक्ताः, स्वरसन्धिः, सवर्णदीर्घः, अल्ट्राख्याः – अल्ट्रा + आख्याः, स्वरसन्धिः, सवर्णदीर्घः। जीर्णाकाशात्– जीर्णं च तदाकाशम्, तस्मात् (कर्मधारयः)। जीर्णम् – जृ+क्त। गिलन्तः – गृ+शतृ (रेफस्य लत्वम्) भास्करीयाः – भास्कर + छ। जीवनम् – जीव् + ल्युट्।

**ब्रह्माण्डान्ता तु या सृष्टिरिह दोहनचालिता।**
**सृजति सा महोत्पातान् भूनभोवार्धिसम्भवान्।। 9 ।।**

**पदच्छेदः –** ब्रह्माण्डान्ता तु या सृष्टिः इह दोहनचालिता। सृजति सा महोत्पातान् भू नभः + वार्धिसम्भवान्।

**अन्वय :** ब्रह्माण्डान्ता तु या सृष्टिः इह दोनचालिता (भवति)
सा भूनभोवार्धिसम्भवान् महोत्पातान् सृजति।

**व्याख्या** – ब्रह्माण्डान्ता – ब्रह्माण्डपर्यन्ता, समस्ता इत्यर्थः। तु – तावत् वक्तव्यस्य वैशिष्ट्ये प्रयुक्तम्। या – पूर्वोक्ता। सृष्टिः –पर्यावरणरूपा परा प्रकृतिः। इह – अत्र, संसारे। दोहनचालिता – आलोडनव्याकुलिता, उद्वेलिता–असन्तुलिता इत्यर्थः। भवति इत्यध्याहारे। सा –पर्यावरणरूपा प्रकृतिः।

भूनभोवार्धिसम्भवान् – भूमिगगनसमुद्रजन्यान्। महोत्पातान् – महाविनाशान्।

सृजति–जनयति, प्रकटयति इति।

**भावार्थः** – यदा पर्यावरणरूपा समस्ता सृष्टिः इहलोके दोहनैः व्याकुलिता भवति तदा पृथिव्याः गगनस्य समुद्रस्य च सन्तुलनं विकृतं जायते, तेन सृष्टिः महाविनाशकपरिणामम् उत्पादयति।

**व्याकरणम् –** ब्रह्माण्डान्ता – ब्रह्माण्ड + अन्ता, स्वरसन्धिः, सवर्णदीर्घः। महोत्पातान् – महा+उत्पातान्, स्वरसन्धिः, गुणः। दोहनचालिता – दोहनैः चालिता इति तृतीयातत्पुरुषः। भूनभोवार्धि–सम्भवान् – भूश्च नभश्च वार्धिश्च इति भूनभोवार्धयः तेभ्यः तेषु वा सम्भवन्ति इति तान् (द्वन्द्वगर्भ–तत्पुरुषः)। महोत्पातान् – महान्तश्च ते उत्पाताः तान् (कर्मधारयः)

चालिता – चल + णिच् + क्त + टाप्। सम्भवः –सम् + भू + अप्।

**ध्वनि – वात – जलादीनां प्रकृतिर्विकृताऽभवत्।**
**प्रकृतिस्थो भवेल्लोक एतदर्थं यतेमहि।। 10 ।।**

**पदच्छेदः –** ध्वनि – वात – जलादीनाम् प्रकृतिः विकृता अभवत्। प्रकृतिस्थः भवेत् लोकः एतदर्थम् यतेमहि।

**अन्वयः –** ध्वनि–वात – जलादीनां प्रकृतिः विकृता अभवत्। लोकः प्रकृतिस्थः भवेत् एतदर्थं यतेमहि।

**व्याख्या –** ध्वनि–वात–जलादीनाम् – शब्द–वायु–नीरादीनाम्। प्रकृतिः – स्वभावः स्वाभाविकी स्थितिर्वा। विकृता – विकारयुक्ता। अभवत् – अवर्तत, जाता इत्यर्थः। लोकः – संसारः, अत्र पर्यावरणरूपो लोकः ज्ञातव्यः। प्रकृतिस्थः स्वभावसदृशः, यथास्वभावम्। भवेत्–स्यात्, वर्तेत। एतदर्थम् – एतत्प्रयोजनार्थम्।

यतेमहि – प्रयत्नः करणीयः।

**भावार्थः –** पर्यावरणसंरक्षणार्थं कविः कथयति यत् अतिशयहस्तक्षेपात् समग्रं पर्यावरणं विकृतं जातम् अतः समस्ता प्रकृतिः स्वस्वभावानुकूला निसर्गरमणीया स्यात् इति प्रयोजनार्थं प्रयत्नः करणीयः।

**व्याकरणम् –** भवेल्लोकः – भवेत् + लोकः, व्यञ्जनसन्धिः, परसवर्णः। विकृताऽभवत् – विकृता + अभवत्, स्वरसन्धिः, सवर्णदीर्घः।

ध्वनिवातजलादीनाम् – ध्वनिश्च वातश्च जलं च इति ध्वनि–वातजलानि तानि आदौ येषां तेषाम् (द्वन्द्वगर्भबहुब्रीहिः)। प्रकृतिस्थः प्रकृतौ तिष्ठति प्रकृतिस्थः (उपपदसमासः)। प्रकृतिः प्र+कृ+क्तिन्। विकृता – वि+कृ+क्त+टाप्।

**वितरतु शिवरूपा ब्रह्मसृष्टिः जनेभ्यः,**
**सकलसुखसमृद्धिं सेविता सा समेभ्यः।**

**त्रिगुणगण–गरिम्णा गुर्विणी सौम्यभावा,**
**भवतु नियमिता नोऽनन्तदोषान्निहन्त्री ।। 11।।**

**पदच्छेदः –** वितरतु शिवरूपा ब्रह्मसृष्टिः जनेभ्यः सकल–सुखसमृद्धिम् सेविता सा समेभ्यः। त्रिगुणगणगरिम्णा गुर्विणी सौम्यभावा भवतु नियमिता नः अनन्तदोषान् निहन्त्री।

**अन्वयः –** सा शिवरूपा ब्रह्मसृष्टिः सेविता समेभ्यः जनेभ्यः सकलसुखसमृद्धिं वितरतु। त्रिगुणगणगरिम्णा गुर्विणी सौम्यभावा नियमिता (सा प्रकृतिः) नः अनन्तदोषान् निहन्त्री भवतु।

**व्याख्या –** सा – पूर्वोक्ता पर्यावरणशक्तिः। शिवरूपा – कल्याणरूपा। ब्रह्मसृष्टिः – ब्रह्माण्डप्राणरूपा परा प्रकृतिः। सेविता – आराधिता 'सेव्यमाना, इति भावः। समेभ्यः सर्वेभ्यः, सकलेभ्यः। जनेभ्यः – मानवेभ्यः प्राणिभ्यः वा। सकलसुखसमृद्धिम् – समग्रानन्दवैभवम्। वितरतु–प्रददातु। त्रिगुणगणगरिम्णा– सत्वं रजः तमश्चेति गुणत्रयस्य गौरवेण। गुर्विणी –गौरवशालिनी। सौम्यभावा –शान्तस्वरूपा। नियमिता – व्यवस्थित–स्वरूपा, सन्तुलिता वा। 'सा पर्यावरणशक्तिः, इत्यध्याहारे। नः – अस्माकम् प्राणिनाम् इत्यर्थः। अनन्तदोषान् – बहून् अवगुणान्। निहन्त्री – विनाशकर्त्री। भवतु अस्तु, स्यात् वा।

**भावार्थः –** पर्यावरणशक्तेः प्राणिनां च मङ्लकामनां कुर्वन्नेवमाह कविः यत् सेव्यमाना एषा कल्याणस्वरूपा पर्यावरणशक्तिः अस्मभ्यं सर्वेभ्यः प्राणिभ्यः सकलविधानन्दवैभवं प्रददातु। सत्त्वरजस्तमसां गौरवेण गुरुभावं प्राप्ता शान्तरूपा सन्तुलिता सा प्रकृतिः अस्माकं असंख्यदोषान् विनाशयेत्।

**व्याकरणम् –** नोऽनन्तदोषान् – नः + अनन्तदोषान्, विसर्गसन्धिः, उत्व–पूर्वरूपम्।

त्रिगुणगणगरिम्णा – त्रयश्च ते गुणाः त्रिगुणाः, तेषां गणः त्रिगुणगणः तस्य गरिमा तेन (कर्मधारयगर्भतत्पुरुषः)।

सौम्यभावा – सौम्यः भावः यस्या सा सौम्यभावा (बहुव्रीहिः)। अनन्तदोषान् – अनन्ताः च ते दोषाः तान् (कर्मधारयः)। ब्रह्मसृष्टिः – ब्रह्माणः सृष्टिः (षष्ठीतत्पुरुषः)। सेविता – सेव् + क्त + टाप्। गरिम्णा – गुरु + इमनिच् + टा। नियमिता – नि + यम् + णिच् + क्त + टाप्। निहन्त्री – नि + हन् + तृच् + ङीप् भावः – भू + घञ्।

# अभ्यासप्रश्नाः

## बहुविकल्पात्मकाः प्रश्नाः –

### निर्देशः – उचितं संकेताक्षरं कोष्ठके लिखत।

1. स्रष्टुः आद्या सृष्टिः अस्ति –
   (क) चेतनात्मिका  (ख) अचेतनात्मिका
   (ग) चेतनाऽचेतनात्मिका  (घ) चित्स्वरूपा  (  )
2. पर्यावरणनाम्ना का ज्ञायते ?
   (क) परा प्रकृतिः  (ख) अपरा प्रकृतिः
   (ग) अप्रकृतिः  (घ) दुष्प्रकृतिः  (  )
3. मातेव का सेवनीया ?
   (क) दुःखाश्रया सुखशक्तिः(ख) चिदाश्रया अचित्शक्तिः
   (ग) पत्राश्रया पुष्पशक्तिः  (घ) देहाश्रया आत्मशक्तिः  (  )
4. दोहनचालिता सृष्टिः कान् सृजति ?
   (क) महोत्पातान्  (ख) महादेवान्
   (ग) महापशून्  (घ) महापुरुषान्  (  )
5. नभः जीर्यमाणं कस्मादभूत् ?
   (क) वायुयानात्  (ख) मानवगमनात्
   (ग) असद्विचारात्  (घ) आणविकस्फोटात्  (  )
6. उद्वेलिता प्रकृतिः केषां जालं तनोति –
   (क) सुखानाम्  (ख) दुःखानाम्
   (ग) विद्यानाम्  (घ) वेदानाम्  (  )

## अतिलघूत्तरात्मकाः प्रश्नाः

### निर्देशः – प्रत्येकम् एकवाक्ये उत्तरं देयम् –

1. आद्या सृष्टिः किमर्थं पर्यावरणतां गता ?
2. ब्रह्माण्डप्राणभूता काऽस्ति ?
3. पुरुषस्य द्वे शक्ती के विद्येते ?
4. नः सर्वसौख्यानां जनयित्री का भवेत् ?
5. 'शक्तिः' इत्यत्र कः धातुः कश्च प्रत्ययः ?

6. केषां प्रकृतिः विकृता अभवत् ?
7. 'दुःखानाम्' अत्र का विभक्तिः किञ्च वचनम् ?
8. 'महोत्पातान्' अत्र कः समासः ?
9. कीदृशी प्रकृतिः दुःखानां जालं तनोति ?
10. 'विकृता' अत्र कः प्रत्ययः ?

### लघूत्तरात्मकाः प्रश्नाः

### निर्देशः – प्रतिप्रश्नं पञ्चसु पंक्तिषु उत्तरं लिखत –

1. कीदृशी प्रकृतिः पर्यावरणनाम्ना कथ्यते ?
2. अल्ट्राख्याः भास्करीया रश्मयः किं कुर्वन्ति।
3. प्रकृतेः दोहनं दुःखदं कथम् ?
4. प्रकृतिशक्तेः सेवा किमर्थं करणीया ?
5. सद्भिः सदा का समाराध्या ?

### निबन्धात्मकाः प्रश्नाः

### निर्देशः – दशसु पंक्तिषु प्रतिप्रश्नम् उत्तरं देयम्।

1. पर्यावरणस्वरूपं लिखत।
2. प्रकृतिशक्तेः दोहनस्य के दुष्परिणामाः ?
3. मङ्गलकामना कस्मिन् श्लोके कृताऽस्ति ? श्लोकस्य अभिप्रायमपि लिखत।
4. प्रस्तुतपाठस्य रचनाकारः कः ? तस्य परिचयं लिखत।